केन्द्रीय विद्यालय संगठन, पटना संभाग, पटना S7SK1

# सत्रान्त परीक्षा, 2017–18

2613

## कक्षा - सप्तमी

क्र० सं०..................

## संस्कृतम्

समय– सार्द्धहोराद्वयम् ] [ पूर्णांका:–80

छात्रस्य / छात्राया नाम ..........................................................................................

खण्ड .............................. क्रमांक .............................................. दिनांक ..............................................

**केवलं परीक्षकस्य कृते –**

| क | | ख | | ग | | घ | | योग: |
|---|---|---|---|---|---|---|---|---|
| | + | | + | | + | | = | 80 |
| 10 | | 16 | | 24 | | 30 | | |

वीक्षकस्य हस्ताक्षर परीक्षकस्य हस्ताक्षर

अस्मिन प्रश्नपत्रे चत्वार: खण्डा: सन्ति –

| | | | | |
|---|---|---|---|---|
| खण्ड क | – | अपठित अवबोधनम् | अङ्का: | – 10 |
| खण्ड ख | – | रचनात्मकं कार्यम् | अङ्का: | – 16 |
| खण्ड ग | – | अनुप्रयुक्त व्याकरणम् | अङ्का: | – 24 |
| खण्ड घ | – | पठित अवबोधनम् | अङ्का: | – 30 |

**निर्देशा: –**

1. उत्तराणि अस्यामेव पुस्तिकायां निर्दिष्टस्थाने लेखितव्यानि ।
2. अन्यत्र कुत्रापि लिखितेभ्य: उत्तरेभ्य: अङ्का: न प्रदास्यन्ते ।
3. समस्ता: प्रश्ना: अनिवार्या: सन्ति ।

Scanned by CamScanner

## खण्ड–क (अपठित अवबोधनम्)–10

1. अधोलिखितम् गद्यांशं पठित्वा तदाधृतान् लिखत –

गङ्गा हिमालयात् प्रभवति । गङ्गाया: उद्भव: गोमुखम् इत्युच्यते । गङ्गा भागीरथी इत्यपि उच्यते । गङ्गाया: जलं पवित्रम् भवति । गङ्गायां जना: निमज्जन्ति । शिवस्य शिरस: गङ्गा निर्गच्छति अत: शिव: गङ्गाधर: इत्युच्यते । गङ्गास्नानेन पापं नश्यति । गङ्गा तु सर्वत्र पूजनीया परं अस्या: महत्त्वं केपुचित् स्थानेपु अधिकं वर्त्तते यथा गङ्गोत्री–उद्गमे, काश्यां, हरिद्वारे, प्रयागे च । गङ्गोत्री गङ्गाया: उद्गम: अस्ति । हरिद्वारे गङ्गा पर्वतात् समभूमौ आपतति । काशी शिवस्य नगरी अस्ति । प्रयागे गङ्गा–यमुना–सरस्वतीनां सङ्गम: भवति । अधुना गङ्गायां बहुविधानि दूषित–जलानि मिलन्ति । गङ्गा राष्ट्रीया नदी इति उद्घोपिता । अत: सर्वेपां भारतीयानां कर्त्तव्यम् अस्ति–यथा गङ्गा अस्मान् पापाद् उद्धरति तथैव गङ्गाजलस्य पवित्रता रक्षणीया ।

(क) एकपदेन उत्तत –

1×2=2

(i) गङ्गा कुत: प्रभवति ?

........................................................................

(ii) गङ्गा–यमुना–सरस्वतीनां सङ्गम: कुत्र भवति ?

........................................................................

(ख) पूर्णवाक्येन उत्तरत–

2×2=4

(i) शिव: गङ्गाधर: कथम् उच्यते ?

........................................................................................................................

(ii) भारतीयानां किं कर्त्तव्यमस्ति ?

........................................................................................................................

Scanned by CamScanner

(ग) विकल्पेभ्य: शुद्धम् उत्तरं चित्वा लिखत – 1×4=4

(i) गङ्गाया: महत्त्वं कुत्र अधिकं वर्त्तते ?

..........................................................................................

(क) गुर्जर-प्रान्ते (ख) राजस्थाने (ग) काश्याम् (घ) मद्रास क्षेत्रे

(ii) शिव: क: उच्यते ?

..........................................................................................

(क) गदाधर: (ख) शार्ङ्गधर: (ग) चक्रधर: (घ) गङ्गाधर:

(iii) हिमालयात् इति पदे का विभक्ति ?

..........................................................................................

(क) प्रथमा (ख) तृतीया (ग) पंचमी (घ) सप्तमी

(iv) पापम् इति पदस्य विलोमपदं लिखत –


..........................................................................................

(क) पातम् (ख) पवनं (ग) पुण्यम् (घ) सत्यम्

## खण्ड–ख (रचनात्मक कार्यम्)–16

2. चित्रं दृष्ट्वा मंजूषात: पदानि चित्वा त्रीणि वाक्यानि लिखत – 2×3=6

| | | | | |
|---|---|---|---|---|
| लिखति | कक्षायाम् | श्यामपट्टे | शिक्षक: | लिखन्ति |
| पुस्तिकायाम् | छात्रा: | उत्तराणि | स: प्रश्नम् | अस्ति |



(i) ..............................................................................................................................

(ii) ..............................................................................................................................

(iii) ..............................................................................................................................

3. अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत – 1×5=5

(क) प्रश्नाः – ..............................................................................................

(ख) नवीनः – ..............................................................................................

(ग) प्रातः – ..............................................................................................

(घ) आगच्छति – ..............................................................................................

(ङ) प्रसन्नः – ..............................................................................................

4. मञ्जूषातः अव्ययपदानिचित्वा रिक्तस्थानानि पूरयत – 1×5=5

| न, कदाचन, सदा, च, अपि |
|---|

(क) भक्तः ...................................... ईश्वरं स्मरति ।

(ख) असत्यं ...................................... वक्तव्यम् ।

(ग) महात्मा गाँधी ...................................... अहिंसां न अत्यजत् ।

(घ) लता मेघा ...................................... विद्यालयं गच्छतः ।

(ङ) ...................................... कुशली भवान् ?

Scanned by CamScanner

## खण्ड–ग (अनुप्रयुक्त व्याकरणम्)–24

5. कोष्ठ्कात् समुचितं पदं चित्वा पूरयत – 1×5=5

(क) .............................. नमः । (हरिं / हरये)

(ख) .............................. परितः कृषिक्षेत्राणि सन्ति । (ग्रामस्य / ग्रामम्)

(ग) .............................. नमः । (अम्बायाः / अम्बायै)

(घ) .............................. उपरि अभनेता अभिनयं करोति । (मञ्चस्य / मञ्चम्)

(ङ) .............................. उभयतः पुत्रौ स्तः । (पितरम् / पितुः)

6. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत – 1×5=5

(क) .............................. बालिका मधुरं गायति । (एकम्, एका, एकः)

(ख) .............................. कृषकाः कृषिकर्माणि कुर्वन्ति । (चत्वारः, चतस्रः, चत्वारि)

(ग) .............................. पत्राणि सुन्दराणि सन्ति । (ते, ताः, तानि)

(घ) .............................. गजः शुण्डेन शाखाम् अत्रोटयत् । (प्रमत्तः, प्रमत्ता, प्रमत्तम्)

(ङ) समवायो हि .............................. । (दुर्जयम्, दुर्जया, दुर्जयः)

7. उदाहरणनुसारं पदरचनां कुरूत – 1×5=5

**यथा – अलिखत् – लिखति स्म ।**

(क) .............................. कथयति स्म ।

(ख) .............................. नयति स्म ।

(ग) .............................. पठति स्म ।

(घ) .............................. धावति स्म ।

(ङ) .............................. हसति स्म ।

Scanned by CamScanner

८. रेखाङ्कितानि पदानि संशोध्य लिखत – 1×4=4

(क) <u>ते</u> बालिकाः मधुरं गायन्ति ।

..........................................................................................................................

(ख) अहं <u>पुस्तकालयेन</u> पुस्तकानि आनयामि ।

..........................................................................................................................

(ग) <u>त्वं</u> किं नाम ?

..........................................................................................................................

(घ) <u>गुरूं</u> नमः ।

..........................................................................................................................

9. शुद्ध– धातुरूपेण रिक्तस्थानानि पूरयत – ½×5=2½

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम : पुरुष+ | ............................ | पतिष्यतः | ............................ |
| मध्यम : पुरुषः | गमिष्यसि | ............................ | ............................ |
| उत्तम–पुरुषः | ............................ | द्रक्ष्यावः | द्रक्ष्यामः |

10. निर्दिष्ट विभक्ति–वचने अधोलिखित–शब्दानां रूपाणि लिखत – ½×5=2½

भल्लूक (तृतीया–एकवचने) – ..........................................................................

उष्ट्र (पञ्चमी–द्विवचने) – ..........................................................................

हरिण (सप्तमी–बहवचने) – ..........................................................................

व्याघ्र (द्वितीया –एकवचने) – ..........................................................................

घोटकराज (सम्बोधनम्–एकवचने) – ..........................................................................

Scanned by CamScanner

## खण्ड–घ ( पठित अवबोधनम् )–30

11. अधोलिखितं गद्यांशं पठित्वा तदाधृतान् प्रश्नान् उत्तरत –

विश्वस्य उपलब्धासु भाषासु संस्कृत–भाषा प्रचीनतमा भाषास्ति । भाषेयं अनेकाषां भाषाणां जननी मता । प्राचीनयोः ज्ञानविज्ञानयोः निधिः अस्यां सुरक्षितः । संस्कृतस्य महत्त्व–विषये केनापि कथितम्–'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' ।

इयं भाषा अतीव वैज्ञानिकी । केचन कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा । अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति । कालिदासादीनां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम् । कौटिल्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति । गणितशास्त्रे शून्यस्य प्रतिपादनं विश्वप्रसिद्धम् । संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते तेषु वास्तुशास्त्रं, रसायनशास्त्रं, खगोलविज्ञानं, ज्योतिषशास्त्रं, विमानशास्त्रम् इत्यादीनि उल्लेखनीयानि ।

(क) एकपदेन उत्तराणि लिखत– ½×4=2

(i) का भाषा प्राचीनतमा ?

...................................................

(ii) शून्यस्य प्रतिपादनं कः अकरोत् ?

...................................................

(iii) कौटिल्येन रचितं शास्त्रं किम् ?

...................................................

(iv) कस्याः भाषायाः सौन्दर्यम् अनुपमम् ?

...................................................

Scanned by CamScanner

(ख) पूर्णवाक्येन उत्तरत – 2×2=4

(i) सङ्गणकस्य कृते सर्वोत्तमा भाषा का अस्ति ?

..........................................................................................................................

(ii) संस्कृतस्य वाङ्मयं कैः समृद्धमस्ति ?

..........................................................................................................................

(ग) (i) "संस्कृते" इति पदे का विभक्तिः ? 1×2=2

..........................................................................................................................

(ii) "सर्वोत्तमा भाषा" इति पदे विशेषणपदम् लिखत–

..........................................................................................................................

(घ) यथायोग्यं संयोज्य लिखत – ½×4=2

| | |
|---|---|
| कौटिल्येन | ज्ञानविज्ञानपोषकम् |
| चिकित्सा | अर्थशास्त्रं रचितम् |
| शून्यस्य आविष्कर्त्ता | चरकसुश्रुतयोः योगदानम् |
| संस्कृतं | आर्यभटः |

(क) .................................................. ..........................................................................

(ख) .................................................. ..........................................................................

(ग) .................................................. ..........................................................................

(घ) .................................................. ..........................................................................

Scanned by CamScanner

12. अधोलिखिते पद्ये पठित्वा तदाधृतान् प्रश्नान् उत्तरत –

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ॥
केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिल भूषणानि सततं वाग्भूषणं भूषणम् ॥

(i) एकपदेन उत्तरत – ½×4=2

(क) कः पशुः ?

..........................................

(ख) का भोगकरी ?

..........................................

(ग) के पुरुषं न विभूषयन्ति ?

..........................................

(घ) का एका पुरुषं समलङ्करोति ?

..........................................

Scanned by CamScanner

(ii) पूर्णवाक्येन उत्तरत – 2×2=4

(क) गुरूणां गुरुः का अस्ति ?

..............................................................................................................

(ख) कीदृशी वाणी पुरुषं समलङ्करोति ?

..............................................................................................................

(iii) मञ्जूषातः पदानि चित्वा अन्वये रिक्तस्थानानि पूरयत – ½×4=2

| पुरुषं, संस्कृता, चन्द्रोज्ज्वलाः, वाग्भूषणं |
|---|

केयूराः (i) ................................... हाराः, स्नानं विलेपनं, कुसुमम्, अलङ्कृता मूर्धजाः (ii) ................................... न विभूषयन्ति । या (iii) ................................... वाणी धार्यते (सा) एका पुरुषं समलङ्करोति । अखिल भूषणानि सततं क्षीयन्ते (iv) ................................... भूषणम् (अस्ति) ।

13. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 1×5=5

(i) मन्त्री सेतोः उद्घाटनार्थम् आगच्छति ।

..............................................................................................................

(ii) कर्मकराः सेतोः निर्माणम् कुर्वन्ति ।

..............................................................................................................

(iii) संस्कृते ज्ञानविज्ञानयोः निधिः सुरक्षितोऽस्ति ।

..............................................................................................................

Scanned by CamScanner

(iv) संस्कृतमेव संगणकस्य कृते सर्वोत्तमा भाषा ।

..........................................................................................................................

(v) शल्यक्रियाया: वर्णनं संस्कृतसाहित्ये अस्ति ।

..........................................................................................................................

14. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत– 1×4=4

(i) विद्या राजसु पूज्यते । ☐

(ii) वाग्भूषणं भूषणं न । ☐

(iii) विद्याधनं सर्वधनेषु प्रधानम् । ☐

(iv) विदेशगमने विद्या बन्धुजन: न भवति । ☐

15. मञ्जूषात: समानार्थकपदानि चित्वा लिखत – ½×6=3

| वने, मृगः, भयंकरम्, पृथिवी, देवालये, जले |
|---|

(i) धरणी = ........................................

(ii) विपिने = ........................................

(iii) करालं = ........................................

(iv) हरिण: = ........................................

(v) सलिले = ........................................

(vi) मन्दिरे = ........................................

❄❄❄❄

Scanned by CamScanner